आंह्रांह्रींक्लींऐंग्लौंग्लौंह्रींक्रोंहसकलरींसंमोहना

॥ नी ॥
॥ १४ ॥

यमहापाशुपतवडवानलनीलकंठास्त्राय एहि २
आगच्छ २ स्फुर २ प्रस्फुर २ प्रलयानलाघोराघो
रतरतनुरूपचट २ प्रचट २ संमोहनाय सदानी
लकंठाय कुंठीकृतसकलशत्रुसंमोहनाय मां
रक्ष २ मम हृदयकमले सदास्थिरो भव सुस्थिरो
भव वरदो भव वरप्रदो भव वाक्सिद्धिप्रदो भव
साक्षात्कारसिद्धिप्रदो भव महाथर्वणास्त्रप्रक

॥ राम ॥
॥ १४ ॥

यानळमस्तुंजयप्रसन्नसंमोहनायपाशुपतद
र्शनशस्त्रखंडनविषविध्वंसनवीराघोरनीलकं
ठायमांरक्षरममहृदयेसदाशिरोभवसुशिरो
भवमंगलांगणदोभवसन्मंगळसहस्त्रानंत
नूतनीलकंठायमांरक्षरक्षममहृदयेसदाशि
रोभवसुशिरोभवअथर्वणनीलकंठास्त्रायहूं
फट्स्वाहा॥ ॥एवंतथाथर्वणाख्यंनीलकंठास्त्र

दारुणं॥अनेकमंत्रहृन्मंत्रमस्त्रनाम्नि शिखाल
कं॥१॥पठेत्सिद्धिप्रदा विद्या भक्तिविश्वासपूर्व
कं॥जपितं देवदेविशी पूर्वसेवांतसाधक॥२॥
षट्सहस्रं जपेद्विद्यामूढोवामुक्तरोपिवा॥येन
केनापि जपितं मंत्रंसिद्धिमवाप्नुयात्॥३॥एतदा
थर्वणशिखावडवानकसंज्ञिकं॥कालरुद्रमहा
नाम्नि विषविध्वंसिनं तथा॥४॥श्रीमहानीलकं

ठाख्यं अस्त्रराजमिदं कल्पो ॥ जपेत्कुष्ठे शरीरा
णां निर्मलं देहमाप्नुयात् ॥ ५ ॥ अष्टादशानि कु
ष्ठानि नश्यंते नात्र संशयः ॥ अथर्वणमहामं
त्रमनेकमंत्रसंपुटः ॥ ६ ॥ अथर्वणशिरशिखा
विद्यानामाख्यमद्भुतं ॥ नीलकंठ विरूपाक्ष ज
गन्नाथेति विश्रुतः ॥ ७ ॥ सुरार्चितांघ्रि शार्दूल
नीलकंठ नमोस्तु ते ॥ ८ ॥ आकृष्टामुष्टिदंष्ट्राद

शनघर्षणयोर्घोतघातंनिपातंरक्षंतंसर्वरक्षं
सकलभयहरंत्रैपुरंविस्फुरंतं॥ शौर्येवीर्योग्नि
रुद्रंरिपुकुळदहनंदेवतासार्वभौमंदेवंश्रीनी
लकंठंत्रिपुरहरमहापातुमामुग्रतेजः॥९॥
इति श्रीअथर्वणशिरशिखायांमाहापाशुपतास्त्र
मयनीलकंठास्त्रमाळामंत्रसंपूर्ण॥ ॥शुभंभवतु
श्रीसांबसदाशिवार्पणमस्तु॥ ॥संवत् १९०७ शाके १७७२

॥नी॰॥
॥१७॥

॥इतिश्रीनीलकंठास्तवसमाप्तः॥

॥राम॥
॥१७॥

॥जगन्नाथः पिता यस्य संप्राप्तिस्तु पनाभकः। प्राणनाथा स्थिये यस्य जगन्नाथा

॥पुस्तकं ।१। तर्कप्रकाशन्यायग्रंथः

॥श्री॥रस्तु॥प्रारंभः॥शुभ॥मं॥नैको॥

अनुमानं निरूप्यते॥

॥ जगंन्नाथः पिता यस्य स्तंभ्रा डिल्युपनामकः । प्राणनाथाभिधे यस्य जगन्नाथा

॥ पुस्तकं ॥ १ ॥ तर्कप्रकाशान्यायग्रंथः

॥ श्री ॥ रस्तु ॥ प्रारंभः ॥ शुभं ॥ भवं ॥ भं ॥

अनुमानं निरूप्यते ॥

त॰ रू॰ प॰ ॥१॥

खं ५ · उ॰

श्रीगणेशाय नमः ॥ ॥ प्रत्यक्षनिरूपणानंतरमुपजीव्योपजीव
कभावसंगत्याऽनुमानं निरूपयन् प्रतिजानीते ॥ अथेति ॥ अथश
ब्दोऽत्राऽऽनंतर्यवचनः तच्च प्रत्यक्षनिरूपणस्यार्थात् ॥ अवधित्व
मवगम्यते ॥ अत एव च सिद्धत्वमपि ॥ निरूप्यत इति । वर्त्तमानार्थक
लट्प्रत्ययेन चानुमाननिरूपणस्य साध्यत्वलाभः ॥ एवं च ॥ सिद्धसा
ध्यसमभिव्याहारे सिद्धं साध्यायोपयुज्यत इति न्यायेन मणिनं ते वद्धुः
स्तायादत्यपत्रैवात्र विप्रस्यतानुमान निरूपणयोरुपजीव्योपजीवकभा
वलाभः ॥ तथा च ॥ उपजीवकत्वसंगत्याऽनुमाननिरूपणमिति भावः ॥

यद्यपि। अनुमितिकरणत्वेनानुमानज्ञानेन प्रत्यक्षज्ञानोपस्थितेति तन्नि
रूपणाया रूपजीव्योपजीवकभावसंभवः॥ तथापि॥ सविशेषणे हि वि
धिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाध इति न्यायेन नि
रूप्यप्रत्यक्षानुमानयोरेवोपजीव्योपजीवकभावलाभः अत्र चोपजी
वकनिरूप्यानुपजीव्यनिरूपणात् उपजीवकत्वादिसंगतेरानंतर्यनि
यामकत्वेपि स्वनंतरेऽस्य प्रतिन्यायेनेच्छा एव नियामकत्वान्न पौर्वापर्य
नियम इति वाच्यं॥ अनुनिरूपणप्रतिज्ञोपाविषयांतरसंचारराहि
त्यरूपशिष्यावधानप्रयोजनकत्वेपि उन्मत्तप्रजल्पितत्वादिशंकानि

या

गसाय मंगलाभिधानस्यैवोचितत्वं न तु संगतिप्रदर्शनस्यापि व्यर्थत्वादि
ति चेन्न ॥ द्विविधं शिष्यावधानं ॥ अनुपेक्षणीयत्वरूपं विषयान्तरसंचारा
हित्यरूपं च ॥ तत्रासंगतत्वज्ञाने नोपेक्षासंभवात् संगतिप्रदर्शनमावश्य
कं तथा च संगतिज्ञाने सति असंगतत्वज्ञानासंभवान्नासंगतत्वज्ञाने
प्रयुक्तमनुपेक्षणीयत्वं द्वितीयं च निरूपणप्रतिज्ञयेति परमरहस्यमत्रा
नुसंधेयं ग्रंथमध्येपि मंगलाचारादर्शनाक्षि मंगलार्थक एवेत्यपि कश्चि
त् आनंतर्यं चात्र ध्वंसाधिकरणक्षणवृत्तित्वं तथा च प्रसंगेद्दानिरूप
णध्वंसाधिकरणक्षणवृत्तिवर्त्तमाननिरूपणविषयोऽनुमानमिति

शाब्दबोधः ननु लक्षणस्वरूपप्रामाण्यादिप्रकारकनिरूपणविषये
ऽनुमानेकरणत्वमात्रस्य कुठारादौमितिकरणत्वस्य प्रत्यक्षादावतिव्या
प्तिवारणाय यच्चेदनुमितिकरणमिति विशिष्टोपादानं ननुपक्षात् मितिशा
नमितित्वमुत्पत्त्या किंचिज्जन्यज्ञानकरणत्वं लक्षणं लभ्यं तथातिप्रसक्तमे
वेत्यत आह अनुमितित्वं चेति तथा च न किंचिज्जन्यज्ञानत्वमनुमिति
त्वं अपितु ज्ञानविशेष एव तदवच्छिन्नकरणत्वं च न प्रत्यक्षादाविति
नातिप्रसंग इति भावः यद्वा ननु व्याप्तिर्व्यवहारो वा लक्षणस्य प्र
योजनमिति नियमेन इतरभेदानुमापकमेवेतल्लक्षणं वाच्यं इत

त०चिं० २

रभेदादनुमानंच॥ अनुमानंप्रत्यक्षादिभ्योभिद्यते अनुमितिकर
णत्वात्॥ यथा प्रत्यक्षादीत्याकारकं तत्रचानुमितेः प्रत्यक्ष
प्रमितिवैलक्षण्यात्तेनप्रत्यक्षप्रमाणेपि अनुमितिकरणत्वग्रहसं
भवेनप्रत्यक्षभेदासत्वेनव्यभिचारज्ञानापत्तेरितिलक्षणप्रयो
जनमनुपपन्नमित्यत आह॥ अनुमितित्वंचेति॥ प्रत्यक्षप्रमित्यनंतर
मनुमिनोमीत्यनुव्यवसायानुदयात्तत्रतद्व्यावृत्तम अनुमितित्वमे
वतद्विषयः प्रत्यक्षे इतिप्रत्यक्षमितिभिन्नज्ञानप्रमितिकरण॥ १५
त्वहेतुकमितरभेदानुमानंसुकरंभवेन्नकोपिदोषइतिसारं

न

नु व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकरणत्वमेवानुमिति
करणत्वं वाच्यं तत्र व्याप्तिज्ञानत्वादेरेव गमकत्वसंभवेनाधिकस्यैव
यर्थ्यमिति इतरभेदानुमानमनुपपन्नमित्यत आह अनुमितित्वं चे
ति तथा च जातिरूपानुमितित्वावच्छिन्नकरणत्वमेव तल्लक्षणं न तू
क्तरूपमिति न वैयर्थ्यत्वशंकापीत्याकूतं ननु अनुमानत्वमनुमितिकर
णत्वं तथा चेतरभेदानुमाने पक्षतावच्छेदकहेत्वोरभेदेनान्वयव्याप्तिज्ञा
नस्यैवानुमितिहेतुतया हेतोः साध्याधिकरणवृत्तित्वरूपव्याप्ति
ज्ञाने जायमाने एवं तुल्यवित्तिवेद्यतया साध्येपि हेत्वधिकरणवृ

तर्क.

न्निश्चयग्रहासंभवेन पक्षतावच्छेदकाश्रये साध्यसिद्धेः सिद्धसाधनताप
त्तिरिति तयोर्भेद आवश्यकः यदि च हेतौ साध्याधिकरणवृत्तित्वज्ञा
नेपि पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरनुदयात् न सिद्धसाधना
वकाशः अन्यथा पृथिवी इतरभेदवती पृथिवीत्वादित्यत्रापि पृथिवीत्वा वी
धिकरणे घटादौ इतरभेदस्य निश्चितत्वादनुमितेरुच्छेदः स्यात्
किंच व्यतिरेकव्याप्तिज्ञानस्यापि अनुमितिकरणतया साध्यसा
मानाधिकरणस्य तत्राघटकत्वेन न सिद्धसाधनमिति विभाव्यते ४
तथा उद्देश्यतावच्छेदकविधेययोरैक्येन शाब्दबोधानुपपत्तिरेव

पि

[illegible]प्यादंडवां दंडवानित्यादेर्निराकांक्षत्वानुपपत्तिरितिमेवं अ
नुमानपदवाच्यत्वस्य लक्षणतावच्छेदकत्वे नकुत्राप्यनुपपत्तेरभावाद्धिति
के[illegible]नुनामार्थयोः साक्षात्कारभेदातिरिक्तसंबंधेनान्वयाबोधानभ्युप
गमेऽनुमितिकरणमित्यस्यानुमितिसंबंधभिन्नकरणमित्यर्थः अनु
पूर्वकमाप्यावुनाऽनुमितिकरणत्वघटकं करणं बोध्यते तथा चानुमि
तिकरणमनुमितिसंबंधभिन्नकरणमिति शाब्दबोधोनानुपपन्नः
करणतायाः कार्यघटितत्वेनानुमितिकरणस्य करणपदार्थत्वे विच्छिन्नानुमि
तिसंबंधभिन्नानुमितिकरणमिति बोधोऽपि नानुपपन्नः विधेय

तात्पर्याद्व्यधिकरणोद्देश्यतावच्छेदकयोरैक्ये एवकाराद्बाधानभ्यु
पगमात् अन्यथा दंडवान्द्रक्तदंडवानितिबाधानुपपत्तेरित्याहुः
ननु अनुमितित्वस्यैवानुमितिलक्षणत्वे विलक्षणलक्ष्यतावच्छेदक
योरैक्यमित्यत आह जन्यज्ञानेति जन्यज्ञानजन्यत्वाव्यभिचारिणी
जन्यत्वाद्यपीजन्यत्वव्यभिचारिणीचयाजातिः तद्वदनुभवत्वमनु
मितिलक्षणार्थः जन्यज्ञाने व्याप्तिज्ञाने तज्जन्यत्वाव्यभिचारिणी ज
जन्यत्वव्याप्याजन्यसाक्षीजन्यस्यव्यभिचारिणीचयाजातिः अनुमि
तित्वेन हृत्वमानोपलक्षणसमन्वयः तथा च तस्य स्वरूपतः लक्ष्य

तावच्छेदकत्वेन तादृशजातित्वेन लक्षणत्वेन न नन्वयोरैक्यमिति भा
वः। ननु जातिमदनुभवत्वमेव लक्षणमस्तु किमेतादृशविशेषणेनेत्यत आ
ह जन्येति अतिव्याप्तिनिराकरणेति ज्ञानाजन्ये इति जन्यज्ञानाजन्यइ
त्यर्थः नित्ये ईश्वरसाक्षात्कारे तद्भिन्नेति तस्य दृत्वं धीजन्यत्वं जन्यज्ञान
जन्यत्वं तथा च प्रत्यक्षत्वस्य जन्यज्ञानजन्यत्वाव्याप्यत्वान्नातिव्या
प्तिरिति भावः तथापि जन्यज्ञानजन्यत्वाव्यभिचारित्वदलेपि अतिव्या
प्तिमुपपादयति तद्भिन्नेति चाक्षुषत्वेहीत्यर्थः तदाश्रयाणामिति॥
चाक्षुषत्वाश्रयाणामित्यर्थः जन्यपदोपादाने च चाक्षुषत्वस्य जन्य

वि

तर्क

ज्ञानान्ये निर्विकल्पके सत्वेन जन्यज्ञानजन्यत्वाव्यभिचारित्वाभा
वान्न तथात्रयत्रस्यपक्षेऽतिव्याप्तिरिति भावः। जन्यजन्यत्वाव्यभिचारि
त्वमुक्तावपि वायुरूपत्वस्य जन्यशरीरादिजन्यत्वव्याप्यत्वात्तथैवातिव्या
प्तिरित्यतं ज्ञानेतीयादि ज्ञानपदोपादानेपि कालोपाधिविधया ज
न्यज्ञानजन्यत्वं निर्विकल्पकेपीति चाक्षुषत्वमादायोक्तदोषतादवस्थ्या
त्तजन्यज्ञाननिरूपितासाधारणजन्यतावश्यं निवेशनीया तथा च ज्ञा
नपदानुपादानेपि जन्यज्ञानत्वावच्छिन्नं प्रत्येव शरीरत्वेन हेतुतया
शरीरादिनिरूपितासाधारणजन्यत्वं निर्विकल्पकेऽस्ति तदेव

६

नी१

...भिन्नार्थ... इत्युक्तौ प्रत्यक्षत्वादेर्वारणाय

ध्वंमिति निविभाव्यते तथापि चाक्षुषत्वावच्छिन्नं प्रति चक्षुषो नैरिति तत्राज
न्यचक्षुरादिजन्यत्वव्याप्यत्वं चाक्षुषत्वस्येति तद्दोषवारणाय ज्ञानपद
निवेशः। [illegible]च जन्यज्ञानानिरूपितासाधारणजन्यत्वमित्यर्थः इति तत्का
व्यनुपपत्तिः जन्यत्वाव्यभिचारिज्ञानत्वाव्यभिचारिजन्यज्ञानत्वाव्यभिचा
रीत्युक्तौ च पि चाक्षुषत्वादेर्वारणात् जन्यज्ञानजन्यत्वाव्यभिचारीत्यंत
जन्यज्ञानजन्यत्वाभिचारिजातिमदन्यतमवत्वं तत्त्वमित्याशयात्मकत्वव्यभिचा
न३ रीत्यंतं त्यक्त आह उपमितित्वविशिष्ट उपमितित्वशाब्दत्वयोरतिदेशवाक्यार्थ
ज्ञानपदज्ञानादिरूपजन्यज्ञानजन्यत्वाव्यभिचारित्वेनातिव्याप्तिरि
त्याशयः अतिव्याप्तिं निराकरोति तद्धीति उपमितित्वं शाब्दत्वं हीत्यर्थः॥

समानाधिकरणत्युक्तौ प्रत्यक्षत्व... ।उपमि
...त्वादिवारणात् ।व्यभिचारीति। ननु तथापि जन्यज्ञानजन्य ४

व्याप्तिज्ञानेति जन्यशाब्दज्ञानेत्यर्थः तदेवोपपादयति उपमितीनां
मिति अतिदेशेति गोसदृशो गवयपदवाच्य इत्याकारकं शाब्दविषयक
ज्ञानजन्यत्वादित्यर्थः ॥ सर्वासामित्यनेनोपमितित्वस्य तादृशज्ञानज
न्यत्वव्याप्यत्वमर्थः एवं च तद्व्यभिचारित्वस्य तत्रातिव्याप्तिरिति भावः शा
ब्दानुभावानां शाब्दबोधात्मकानुभवानां क्वचिच्छाब्दानुभवानामिति पाठः
तत्र शब्दप्रयोज्यानुभवानामित्यर्थः ननु तत्र प्रथमजन्यत्वोपादानवै
यर्थ्यमित्याशयेन शंकते नचेति [illegible] व्यभिचारीत्यत एव का
रणं प्रथमजन्यत्वव्यवच्छेदः उत्तरयति अनुमितित्वस्येति अ
संभवादिति अथाच तादृशजात्यप्रसिद्धात् तद्भिन्नमादाय न लक्षणगम

मनसंभवइतिभावः॥ निषेधंति तस्येति तत्वज्ञानहेतुत्वेजात्यस्येत्य
र्थः शब्देति आत्माशरीरादिभ्योभिन्नः तत्वमसीत्यादिवाक्यविशेष
विषयकेत्यर्थः इदंच मननेशाब्दस्याप्युपनीतभानमभिप्रेत्य व्यभ
भिचारित्वादिति। तथा च तस्यशाब्दज्ञा। नजन्यत्वविभिचारित्वाभावा
दवधारणमितिभावः ननुनिदिध्यासनोपदर्शीणो मननंतत्वज्ञानाजन
कमननत्वविशिष्टज्ञानजन्यत्वव्यभिचारित्वमेवेत्यत आह जाति
पदमितिनाकारश्चतत्वज्ञानस्य मननजन्यत्वेमीकारेपिनक्षातिरितिसू
चनायेयम्। ननुशरीरादिभ्यो भिन्नत्वेन श्रुतस्यात्मनोयुक्तिभिरनु
चिंतनंमननं तदुक्तं मंतव्यश्चोपपत्तिभिरितिवाक्यानुमानादिजन्य

तर्कप्र.

मनुमित्यात्मकमेवा॥ अनुमितावुपनीतभाननिषेधेन च तस्य शाब्दवि
षयकत्वासंभवात् लिंगोपहितलैंगिकभाने प्रमाणाभावेनालिंगविष
यापि शाब्दस्यानुमितौ भानासंभवाच्च तथा च शाब्दज्ञानजन्यत्वव्यभिचा
रित्वं तत्राक्षुण्णमेवेत्यत आह जातिपदं चेति वाकारस्यात्र मननस्यश
ब्दविषयकत्वानभ्युपगमोपि न क्षतिरित्येतस्य सूचनायेति केचित्तु श
विशेष. ब्दविषयकेति श्रोतव्यो मंतव्यश्चेत्यादिश्रुतिवाक्यरूपशाब्दज्ञाने त्यर्थः
जन्यशाब्दत्वादिं जन्यत्वं प्रयोज्यत्वं जन्यशाब्दज्ञानप्रयोज्यत्वाव्यभिचा
रित्वादित्यर्थः तथा च जन्यशाब्दधीजन्यत्वव्यभिचारित्वपदेन जन्यश
ब्दज्ञानप्रयोज्यत्वव्यभिचारित्वमेव विवक्षणीयं तत्त्वज्ञानवृत्तिवे

जात्यस्य च शाब्दज्ञानप्रयोज्यत्वव्याप्यत्वादेव नातिप्रसंग इति भावः ॥ ३२

भक्तित्वादिवारणाय जातिपदस्य मानसवृत्तिजातिपरत्वावश्यकत्वे

तत एवात्राप्यतिप्रसंगवारणे किं जन्यत्वपदस्य प्रयोज्यपरत्वमंगीकृत्य

तादृशातिव्याप्तिवारणेनेत्यत आह ॥ जातिपदं चेति ॥ वाकारश्च जन्यपदस्ये

प्रयोज्यत्वपरत्वाभावे पि न क्षतिरित्येतत्सूचनायेत्याहुः ॥ तदस्य ॥ शाब्द

ज्ञानप्रयोज्यत्वं व्यभिचारित्वाभावादसंभवापत्तेरिति ॥ अत एवेति ॥ जातिप

दस्य मानसवृत्तिजातिपरत्वादेवेत्यर्थः भक्तित्वेति ॥ आराध्यत्वेन ज्ञानं भक्तिः

आराधना च गौरवित प्रीतिहेतुभूता क्रिया फलावश्यंभावनिश्चयश्च

तल्लक्षणे बोध्ये आराध्यव्यक्तिज्ञानं विनाप्याराध्यत्वेन ज्ञानासंभ

+ व्याप्तिश्चरितार्थत्वे स्वनिवेशादिवाक्यपदप्रयुक्ताशाब्दज्ञानजन्यत्वस्यानुमितावपि सत्वेना

+ नुमितित्वव्याप्तिलक्षणं स्यन्न्च ५

वात् [illegible]कलज्ञानं विना फलावश्यंभावनिश्चयासंभवात्। भक्तित्वश्र
द्धात्वयोर्जन्यज्ञानजन्यत्वाव्यभिचारित्वस्य सत्वात् जन्यशाब्दधीजन्य
त्वव्यभिचारित्वस्यापि सत्वाच्च तत्रातिप्रसंगः। जातिपदस्य मानसावृत्ति
जातिपरत्वे चेत्तथा मानसवृत्तित्वेन नातिप्रसंग इति। ननु भक्तित्वश्रद्धात्वा
दर्जातित्वे मानाभावादेव नातिव्याप्तिरित्यत आह। आदाविति आदिनाऽऽ
पत्तित्वपरिग्रहः। आपाद्यत्वस्याविधेयत्वातिरिक्तत्वे मानाभावेन वह्न्यनुमि
त्यनंतरमपि वह्निमापादयामीति प्रतीत्यापत्तेः स्वादृशानुव्यवसायं प्रति व
ह्निविधेयकापत्तित्वेनैव हेतुतया आपत्तित्वजातेरावश्यकत्वेन तद्धारणा
य जातिपदस्य मानसावृत्तिजातिपरत्वमावश्यकमिति तत्त्वं। अनुभव

पदव्यावृत्तिमाह अनुभवपदमिति स्मृतिवारणायेति स्मरामीत्यनुग
तप्रतीत्याऽनुभवसामग्रीप्रतिबध्यतावच्छेदकतया वा सिद्धं स्मृतित्वमा
दायातिप्रसंगवारणायेत्यर्थः अनुभवपदोपादाने स्मृतिभिन्नज्ञानत्व
रूपानुभवत्वस्य स्मृतावसत्त्वान्नातिव्याप्तिरिति भावः ननु तथाप्येतादृशाप
रोक्षत्वजातिमादायैव लक्षणस्य शाब्दबोधादावतिप्रसंगः।। न च तादृश
जातौ मानाभावः।। अनुमित्यादिस्थलीयबाधादिप्रतिबध्यतायां आहार्यप्र
त्यक्षे व्यभिचारवारणाय प्रत्यक्षान्यज्ञानत्वस्यावश्यं निवेशनीयतया तेषां
मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण गौरवात्त[illegible]दपेक्ष्य प
रोक्षत्वजा[illegible]तेरेव प्रतिबध्यतावच्छेदकत्वौचित्यादित्यत आह। दिगिति। अ

नुभवत्वं विहाय परोक्षत्वं स्मृतौ परोक्षत्वं विहायानुभवत्वं प्रत्यक्षेऽनुमितौ
चोभयोः समावेशादिति अनुभवत्वेन संकरान्न परोक्षत्वं जातिः एवं भिन्नवि
षयकानुमित्सा विशिष्टानुमितिसामग्रीप्रतिबध्यतावच्छेदकतया सिद्धानु
मितित्वव्याप्यज्ञानत्वरूपजातिमादाय संकराच्च विधेयताया आपत्तिसाधार
णेन बाधप्रतिबध्यतावच्छेदकत्वासंभवेपि अनुमित्यादौ विशिष्यानुमिति
त्वादिकं निवेश्यैव बाधबुद्धेः प्रतिबंधकत्वमिति नाहार्यप्रत्यक्षे व्यभिचारः
[illegible] एवं शाब्दबोधे बाधबुद्धेः प्रतिबंधकत्वस्या[illegible] तया लाघवाद्योग्य
ताज्ञानं शाब्दबोधे हेतुरिति सिद्धांतः॥ अनाहार्यप्रत्यक्षान्यत्वं निवेश्यै
व वा आहार्यप्रत्यक्षे व्यभिचारो वारणीयः। वस्तुतस्तु जन्यतासंबंधेन वा

१०

त्वा

धविशिष्टान्यवच्छिन्नं प्रतिबाधाभावस्य हेतुत्वोपगमेन प्रत्यक्षानुमित्या
दिसाधारणैककार्यकारणभावेनैवोपपत्तेः परोक्षत्वनिवेशस्यानर्थक्या
त् स्वविशिष्टत्वावच्छिन्नं प्रति इच्छाया हेतुत्वेन च नेच्छाऽन्यकालबाधका
ले विशिष्टबुद्ध्यापत्तिः। अन्यथा इच्छाया उत्तेजकत्वेऽप्रामाण्यज्ञानाभावा
दिना विशेषणविशेष्यभावविनिगमनाविरह इत्यादिकं बहुतर मूहनीयं
ननु अनुमितित्वजातौ मानाभावेन लक्षणमसंभवि चानुमिनोमीत्यनुव्य
वसायविषयतया न तत्सिद्धिः योग्यात्मविशेषगुणानां विषयविनिर्मो
केणाभानानुपगमात् केवलमनुमिनोमीत्यनुव्यवसायस्यासिद्धेः न
च पर्वते वह्निमनुमिनोमीत्यनुव्यवसायविषयतया तत्सिद्धिरिति वाच्यं

न४

तर्क॰

१९

वह्निप्रकारकानुमितित्वस्य तद्विषयत्वे वह्निमान् पर्वतो घटवानित्यनुमि
त्यनंतरं तादृशानुव्यवसायापत्तेः वह्निनिष्ठविधेयताशालित्वस्य तद्वि
षयत्वावश्यकत्वेऽनुमितित्वस्यानिवेशान्नद्विषयतापातसिद्धेरसंभवात्
[illegible]पर्वतोद्देश्यकवह्निविधेयकानुमितित्वस्य धूमपरामर्शजन्यतावच्छे
दकतया तत्कोटिप्रविष्टत्वेन तत्सिद्धिरिति वाच्यं॥ ॥साधनादिभेदेन व्याप्ते
र्भिन्नतया आलोकपरामर्शजन्यानुमितौ व्यभिचारवारणाय स्वाव्यवहि
तोत्तरक्षणोत्पत्तिकत्वसंबंधेन धूमपरामर्शविशिष्टानुमितित्वस्य त
त्कार्यतावच्छेदकत्वावश्यकत्वे तत्रानुमितित्वमनिवेश्य धूमपरामर्शवि
शिष्टज्ञानत्वस्यैव तत्त्वोपगमात् तत्कोटिप्रविष्टतया तत्सिद्धेरसंभवात्

१९

र्वंसिद्ध्यभाववविशिष्टत्वस्यैव सिद्ध्यभावं कार्यतावछेदकतया तत्का
र्यतावछेदकतयापि न ताक्षिद्धिरिति चेन्न मैवं वह्निनिष्टविधेयताशा
लिज्ञानत्वस्य वह्निमनुमिनोमीत्यनुव्यवसायविषयत्वे पर्वतो वह्निमान्
स्यादित्यापत्यनंतरमपि तादृशानुव्यवसायापत्तेः तथाहि वह्निमापादयामी
त्यनुव्यवसायस्य वह्निप्रकारकापत्तित्वविषयकत्वे वह्निमान् पर्वतो घटवा
न्स्यादित्यापत्यनंतरमपि तादृशानुव्यवसायापत्त्या व्याप्यापादकापत्तित्वमेव त
द्धूमो बाध्यः। तत्र चापत्तित्वस्यापादकभेदेन भिन्नस्यातिरिक्तस्य कल्पने गौरवा
त् अनुमित्यापत्तिसाधारणविधेयत्वमेवापाद्यत्वे तथा चानुमित्यनंतरमा
पादयामीत्यनुव्यवसायापत्त्या आपत्तित्वस्यैवापत्त्यनंतरमप्यनुमिनोमी

त्यनुव्यवसायापत्तेरनुमितित्वस्यापि सिद्धेः॥ एवं पर्वते वह्निरित्यादिशा
ब्दबोधानंतरमपि तादृशानुव्यवसायापत्तिः शाब्दबोधे प्राङ्निर्दिष्टस्यैवो
द्देश्यत्वेन चरमनिर्दिष्टस्य च विधेयत्वेन तत्र वह्नौ विधेयतायास्त्रावरूप
कत्वात् प्यात्र वह्निपर्वतवृत्तित्वयोरेवोद्देश्यविधेयभावस्वीकारे प
र्वते वह्निः वह्निः पर्वते इति शाब्दबोधयोरुद्देश्यविधेयभाव वैलक्ष
ण्यप्रसंगात् विधेयतायामनुमितित्वे च मानाभावः वह्निप्रकारकज्ञा
नत्वस्यैव वह्निमनुमिनोमीत्यनुव्यवसायविषयत्वात् विषयतया तादृशा
नुव्यवसायं प्रति च तत्तदनुमितिसामग्री विशिष्टज्ञानत्वेन तादात्म्यप्रत्यास
त्या हेतुत्वं कार्यतावच्छेदकं च वह्निप्रकारकतत्तत्सामग्रीविशिष्टज्ञानविषय

मानसत्वमेव तत्तदनुमितिसामग्रीचवाधा। नाप्यसिद्ध्यभावसत्त्वपराम
र्शादिरूपा सामग्री वशिष्ट्यं तस्या व्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन। नचै
तदपेक्ष्य वह्निनिष्ठविधेयताशाल्यनुमितित्वेन हेतुत्वे लाघवाद्विधेयताया
अनुमितित्वस्य चासिद्धिरिति वाच्यं। लाघवमात्रेणातिरिक्तविषयतासिद्धौ। अ
व्यवहितोत्तरत्वादेर्निवेशे गौरवेण धूमपरामर्शजन्यतावच्छेदककोटिप्रविष्ट
त्वेनाप्यतिरिक्तविषयतासिद्धिप्रसंगात्। एवमनुमितिं प्रति विलक्षणविषय
ताशालिज्ञानत्वेन हेतुतयैवोपपन्नो व्याप्त्यादिविषयतानिवेशप्रयोजना
भावाच्चेति लाघवमात्रेणातिरिक्तविषयतायां सिद्धेरभावात् विधेयतयामा
नाभावेन सामग्रीविशिष्टज्ञानत्वेन हेत्वस्यावश्यकत्वे विधेयतायामिवा
तु

नुमितित्वेऽपि मानाभाव इति चेन्न लाघवेनातिरिक्तविषयतायानभ्युप
गमेऽपि त्वापत्यनंतरं तादृशानुव्यवसायवारणाय बाधाभावस्यावच्छेदककोटौ
निवेशगौरवात् तद्घटितानुमितिसामग्रीविशिष्टप्रकारकानुमिति
त्वेन हेतुत्वेनैवापत्यनंतरं तादृशानुव्यवसायवारणे लाघवेनानुमितित्वजा
तेरावश्यकत्वात् । अनुमितिसामग्रीजन्यत्वानुपस्थितिदशायामपि वह्निना
नुमिनोमीत्यनुव्यवसायोदयात्सामग्रीजन्यज्ञानत्वावच्छिन्नाभावस्य तद्विष
यत्वाभावेन वह्निनिष्ठविषयताशाल्यनुमितित्वावच्छिन्नाभावस्य तद्विषय
त्वावश्यकत्वात् विषयतयानुमितित्वजातेस्सिद्धिः । नच स्वव्याप्यव
त्तापरामर्शादिघटितसामग्रीविशिष्टज्ञानत्वसंबंधावच्छिन्नसाध्यनिष्ठ

२३

[illegible]

प्रतियोगितावच्छेदकताज्ञानाभावएवेत्यद्विषय इति वाच्यं ॥ तस्य संबंध
त्वमानाभावात् वृत्त्यनियामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वे चेति कृ
तेपस्थितिन नुज्ञायमानलिंगस्यानुमितिकरणत्वे तीतानागतहेतुका
म० नुमितेरपलापः तस्यानुमितेः पूर्वमसत्त्वात् अन्यस्य च व्याप्यत्वेनाज्ञानात् ॥
व्याप्तेरैक्याभावेन यत्र विशेष्ये विशेषणमिति न्यायेन परापरामर्शस्तत्र परा
मर्शपूर्वं व्याप्तिज्ञानस्यासंभवेन च व्याप्तिज्ञानत्वेनापि न करणत्वसंभव इत्या
शयेनाह [illegible]तिनन्विति ॥ लघुपदार्थेति हेतुसाध्यप्रभावज्ञानादिकमित्यर्थः ॥
नचाभावज्ञानत्वेनानुमितिहेतुत्वे परामर्शादिस्थले न्यकालेप्यनुमित्यापत्ति
रिति वाच्यं विशेषसामग्रीसहकृताया एव सामान्यसामग्र्याः फलोपधाय

[illegible]

न.प्र.ज.

१४

कत्वेन परामर्शाद्यभावेनाप्यभावादिति वक्ष्यति अत्र यद्यपि व्याप्ति
घटकत्वेन वक्तुमुचितम्। तथापि व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपपरा
मर्शद्वारा तस्य कारणत्वसूचनाय तथोक्तिः। ननु व्याप्तेर्निर्वक्तुमशक्यतया
कथं तद्घटकपदार्थज्ञानं करणमित्याशयेन पृच्छति ननु केयमिति साध्यात्यं
ताभाववदिति वह्निमान्धूमादित्यादौ वह्न्यभाववति जलह्रदादौ धूमस्यावि
द्यमानत्वाल्लक्षणसमन्वयः धूमवान्वह्नेरित्यत्र धूमाभाववति अयोगोल
के वह्नेर्वर्त्तमानत्वान्नातिव्याप्तिः पर्वतीयेति पर्वतीयवह्नेस्तद्व्यक्तित्वेना
त्यंताभाववतीत्यर्थः पूर्वक्षणवृत्तित्वविशिष्टवह्न्यभाववह्निघटोभयाभा
वसमवायसंबंधावच्छिन्नवह्न्यभावादीनां वैशिष्ट्यव्यासज्यवृत्तिधर्मानव

श

ह

२४

[illegible]

च्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वेन साध्याभा
वविशेषणेन वारणं संभवतीति तत्परित्यागः ननु साध्यतावच्छेदकसंबंधा
वच्छिन्नवृत्तित्वसामान्याभाववत्त्वं [illegible] समवायसंबंधावच्छिन्नद्वित्वाव
च्छिन्नप्रतियोगिताकवह्न्यभाववारणाय साध्यतावच्छेदकसंबंधावच्छि
न्नत्वं साध्यतावच्छेदकावच्छिन्नत्वं निवेश्यः [illegible] न एवं पर्वतीयवह्न्यभाव
*शुद्ध स्याभिविद्धिः [illegible] पर्वतीयवह्नित्वं पर्वतीयत्वविशिष्टवह्नित्वं [illegible] वि
शिष्टस्यानतिरेकात् वह्नित्वावच्छिन्नप्रतियोगिताकत्वमक्षतमेवेति वाच्यं॥
साध्यतावच्छेदकावच्छिन्नत्वस्य साध्यतावच्छेदकपर्याप्तावच्छेदकताक
त्वार्थकत्वेन पर्वतीयत्ववह्नित्वोभयपर्याप्तावच्छेदकताकः शुद्धवह्नि

त.कु.अ.

२४

त्वपर्याप्तत्वाभावेनानुपपत्यभावात् यदि च उभयादेः प्रत्येकमतिरि
क्ततया पर्वतीयत्ववह्नित्वोभयपर्याप्तावच्छेदकतायाः अपि तु द्रव्यवह्नित्व
द्रव्यत्वपर्याप्तत्वादुक्तदोषस्तदवस्थ एवेति विभाव्य तेन तत्साध्यतावच्छे
दकभिन्नानिष्ठावच्छेदकतानिरूपकत्वे सति किंचिद् अवच्छेदकतानिरू
पितसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकत्वमि
त्यनिष्कर्षो बोध्यः सत्यं तन्निवेशात् पर्वतीयत्ववह्नित्वोभयावच्छिन्नप्रति
योगितामादाय विशेष्यदलनिवेशो न्न पर्वतीयत्वविशिष्टवह्नित्वावच्छि
न्नप्रतियोगितामादाय यथाप्यापत्तेर्नाप्रसंगः वह्न्यभाववति धूमाद्यप्रवेस
मवायेन धूमस्य सत्वात् हेतुतावच्छेदकसंबंधनिवेशः धूमाभाववद्वृ

इदं वृत्तित्वाभावस्य वह्न्यभा सत्त्वाद्धूमवान्वह्नेरित्यत्रातिव्याप्तिवारणाय सा
मान्याभावेति [illegible] वायोगोलकवृत्तित्वस्यापि सामान्यान्तर्गततया तदभा
वस्य हृदत्वावच्छिन्ना न्नातिव्याप्तिः न च तथाप्ययोगोलकवृत्तित्वघटा
भयाभावस्य सत्त्वादतिप्रसंगतादृवस्थ्यमिति वाच्यं तादृशवृत्तित्वत्वाव
च्छिन्नाभावस्य सामान्याभावपदेन लाभात् अथ कालिकसंबंधेन वह्न्य
भाववति पर्वतादौ धूमस्य सत्त्वात् साध्याभाववत्त्वमभावीयदैशिकविशे
षणतादिनिवेशेन वाच्यं एवं च घटत्वाभाववान् पटत्वादित्यादौ घटत्वा ६२
भावाभावस्य साध्याभावस्य घटत्वरूपस्य समवायेनैव सत्त्वादभावीय
विशेषणतया तदधिकरणाप्रसिद्धेः अत्र केचित् भूतले घटो नास्ति

तर्क०

त्पत्तेः स्वघटाभावो नास्तीति प्रतीतावपि अभावीयदैशिकविशेषणताविष
यकत्वमनुभूयते इति भावाभावसाधारणीं विशेषणतामंगीकृत्य प्रसिद्धिं
परिहरंति तन्न सत् तथा सत्यपि कालिकसंबंधावच्छिन्नप्रतियोगिताक
स्याकाशाभावाभावस्य साध्यतायामात्मत्वादिहेतौ व्याप्तेः आकाशा
भावरूपसाध्याभावस्याभावीयविशेषणतयात्मनि वृत्तेः एवं भावाभा
वसाधारणविशेषणतास्वीकारेऽभावीयविशेषणतया भूतले वर्त्तिर्घट
इति प्रतीत्यापत्तेश्चेति चिन्त्यमेवं साध्यवत्ताग्रहविरोधितानियामकसंबंधे
न साध्याभाववत्त्वस्य विवक्षितत्वात् घटत्वाभाववान् पटत्वादित्यादौ
समवायेन घटत्वाभाववत्ताग्रहविरोधितानियामकत्वस्य प्रसिद्धे

त्संभवात् ननु तथापि जातिमान् सत्वादित्यादौ जात्यभाववत्सामान्या
दिनिरूपितत्वेनुतावच्छेदकसमवायेन वृत्तित्वाप्रसिद्ध्या व्याप्तिरितिचे
न्न स्याधिकरणवृत्तिसाध्याभाववत्कत्वमित्यस्य तदर्थत्वात्॥ अथैवमपि
धूमाधिकरणे कालिकसंबंधेन वह्न्यभाववत्त्वाद्व्याप्तिः अभावीयवि
शेषणतयावृत्तित्वनिवेशे च घटत्वाभाववान् प्रमेयत्वादित्यत्राव्या नि १
प्तिः घटत्वाभावाभावस्य घटत्वस्य विशेषणतयाऽवृत्तेः तथा च साध्य
वत्ताग्रहविरोधिना नियामकसंबंधेन वृत्तित्वस्यावश्यं निवेशनीयतया
सत्ताभाववान् जात्यभावादित्यत्राव्याप्तिः जात्यभावाधिकरणसामान्यादि

निरूपितसाध्यवत्ताग्रहविरोधितानियामकसंवायसंबंधावच्छिन्नवृत्तिता
प्रसिद्धेरिति स्याधिकरणवृत्तिसाध्याभाववधिकरणताकत्वस्याविव
क्षितत्वात्। साध्याभाववधिकरणतान्चसाध्यवत्ताग्रहविरोधितानिया
मकसंबंधावच्छिन्ना अवृत्तित्वेस्वरूपसंबंधेनवयास्ये व
नात्यभाववधिकरणसामान्यादिनिरूपितस्वरूपसंबंधावच्छिन्नवृत्तित्व
स्यप्रमेयत्वादावप्रसिद्धत्वात् तदभावस्य च भाववाभावाधिकरणत्वेसत्वेना
नुपपत्त्यभावादिति अव्याप्यवृत्तिसाध्यकेऽव्याप्तिवारणाय प्रतियोगि
वैयधिकरण्यमप्यत्रनिवेशनीय केचित्तु हेतुतावच्छेदकसंबंधावच्छि

ना वृत्तित्वं यत्स्वरूपसंबंधेन तत्प्रतियोगिताकसाध्याभाववद्वृत्तित्व
साध्याभावो [illegible] सत्ताभावान् जातिरित्यादौ न कोपि दोष इत्याहुः। अ
परे तु साध्याभाववद्वृत्तित्वमेव सत्ताभावान् जातिरित्यादौ च प्रसिद्धेन
दृष्टान्तादहेतुतावच्छेदकसंबंधसामान्ये साध्याभाववदनुयोगिकत्व
प्रसिद्धिः एतच्च साध्याभावाधिकरणवृत्तित्वाभावादिरित्याहुः। केचित्तु
पर्वतो वह्निमान् [illegible] तथापि केवलान्वयिनि साध्याभावाप्रसिद्ध्या
व्याप्तिलक्षणगमनासंभव अव्याप्तिः अनुमितिकरणत्वेनाभिमत
स्य व्याप्तिज्ञानस्य व्यतिरेकव्यभिचारेण नग्निर्भवतिन्यथा सा च

निष्ठ२

तर्क

त्वाभावाप्रसिद्धावपि प्रतियोगितया वाच्यत्वीयोऽभावइत्याकारकभ्रमा
त्मकज्ञानमादायानुमितिरूपफलत्वात् तथाहि साध्यनिष्ठविषयता
निरूपिताभावविषयतानिरूपिताधिकरणविषयतानिरूपितवृत्तित्ववि
षयतानिरूपिताभावविषयतानिरूपितहेतुतावच्छेदकावच्छिन्नविष
यतानिरूपितपक्षनिष्ठविषयताशालिज्ञानत्वेनैवानुमितिहेतुत्वं तच्च
भ्रममादायोपपद्यत एव नच अभावो न वाच्यत्वीय इत्येतादृशविशेष
दर्शनकाले तदनुपपत्तिरेव न च तदानीष्यत एवानुमितिरिति वाच्यं।
तस्यास्तदाप्यनुभूयमानत्वादिति चेत् तथापि निरुक्तमिलितावच्छेदकज्ञा

निष्ठ३ हेतुनिष्ठ निष्ठ

न

नस्यबाधबुद्ध्यप्रतिबध्यत्वतयाऽभावोनवाच्यत्वीयइतिज्ञानकाले
पिप्रतियोगितयावाच्यत्वीयइतिनिर्द्धर्मितावच्छेदकज्ञानोत्पत्तौवा
ध्यकाभावेनानुमितेरुपपत्तेः अभावत्वमनिवेश्यसाध्यीयवद्वृत्तित्व
ज्ञानस्यैवबानुमितिहेतुत्वादितिचेन्न मैवं अवृत्तित्वज्ञानस्यनिर्द्धर्मिता
६२ वच्छेदकज्ञानप्रतिप्रतिबंधकतयाप्रतियोगितयावाच्यत्ववद्वृत्तीतिज्ञा
नकालेवाच्यत्वीयवद्वृत्तित्वज्ञानस्याप्यसंभवेनानुमित्युपलापस्यदुरु
द्धरत्वादितिनिपुणतरमालोचनीयंसस्मदर्शिभिरिति॥ ननुनीलघटे
यत्किंचिद्घटप्रतियोगिकभेदसत्वेननीलघटोघटान्यइत्यादिवाक्य

स्यापि प्रामाण्यापत्तिरिति अन्वयिता वच्छेदकावच्छिन्न प्रतियोगि
ताकान्योन्याभावबोधं प्रत्येव किंचित्पदसमभिव्याहृतान्यादियदज्ञा
नत्वेन हेतुत्वमुपेयं एवंच प्रकृतेपि साध्यवत्पदसमभिव्याहृतान्यप
दस्य साध्यवत्त्वावच्छिन्न प्रतियोगिताकान्योन्याभावबोधकत्वमेव तथा
च साध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाववदवृत्तित्वमेव लक्षणं
लभ्यते तत्र नोक्तदोष इत्याशयेनाशंकते अर्थेति साध्यवत्त्वेति साध्यता
वच्छेदकावच्छिन्न साध्यवत्पर्यः अन्यथा साध्यवत्त्वस्य साध्यस्वरूपत्वेन प
र्वतीयवह्निमदन्योन्याभावावारणात् साध्यतावच्छेदकनिष्ठावच्छेदक

ला

वत्व २

तानिरूपक प्रतियोगिताकान्योन्याभाववदवृत्तित्वमिति तु निष्कर्षः
साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावविवक्षणेन पूर्वो
क्तलक्षणेऽपि चालनीयन्यायेनाव्याप्तिनिराससंभवेऽपि अत्यन्ताभावस्या
व्याप्यवृत्तितया संयोगी द्रव्यत्वादित्यादावव्याप्तिः इह त्वन्योन्याभावस्य
व्याप्यवृत्तितया संयोगवदन्योन्याभावस्य द्रव्येऽसत्त्वेनैव नाव्याप्तिरि
ति पूर्वत्र प्रतियोगिवैयधिकरण्यादिनिवेशगौरवमिति न तत्र तथा वि
वक्षितमिति बोध्यं अव्याप्तिं निरस्यति नन्वेति नहीत्यर्थः केवलान्वयीति।
इदं प्रमेयं वाच्यत्वादित्यादावित्यर्थः अत्यन्ताभावाप्रतियोगित्वं केवला

न्वयित्वं प्रमेयत्वस्य च सार्वत्रिकत्वेन ल[illegible]दन्याप्रसिद्ध्याऽव्याप्तिरि
त्यभावः लाघवात्साध्यवदन्यावृत्तित्वरूपव्याप्तिज्ञानमेवानुमिति
हेतुः केवलान्वयिनि च तादृशज्ञानासंभवेनानुमितिरेव नोपपद्यते एवं
च न काप्यव्याप्तिरिति मीमांसकमतमुपदर्शयति अत्र मीमांसका इति
प्रमेयत्वमिति साध्यवदन्यावृत्तित्वज्ञानाभावेनानुमित्यसंभवादनुमि
तामत्वाकारकतल्लौकिकप्रत्यक्षानुदयापत्तिरित्यर्थः न चान्योन्याभा
वप्रमेयत्ववत्प्रतियोगिकत्वभ्रमदशायामेव तादृशानुभवोपपत्तिरि
ति वाच्यं तथापि प्रमेयत्वस्य केवलान्वयित्वज्ञानदशायां तादृशात्र

तीत्यनुपपत्तितादवस्थ्यात्कारणबाधात् विशेषदर्शनदशायां
साध्यवदन्यावृत्तित्वज्ञानस्यानुमितिकारणत्वेनाभिमतस्य बाधात्
असंभवात् व्याप्तिरिति इयं मेयत्वमनुमिनोमीतिप्रतीतिः मेयत्ववि
षयकानुमितिरिव तादृशानुव्यवसायविषयः कारणबाधेन च प्रमे
यत्वविषयकानुमितेरनुत्पत्त्या विषयबाधेन तादृशप्रतीतेर्भ्रमत्व
मित्यर्थः व्यभिचारेण व्यतिरेकव्यभिचारेण तद्धेतुः साध्यवदन्यावृ
त्तित्वरूपव्याप्तिहेतुः कारणत्वासिद्धेरिति सिद्धे तस्य कारणत्वे तदभा
वेन तयोरनुमितिरित्युपेयं तादृशानुमितावेव व्यभिचारेण च तस्यैव

तर्क
श्री

कारणत्वमसिद्धान्तस्य परेणतादृशानुमितिरेवानेयपृत इति वाच्यं
॥ तथानुभवस्य प्रमाणत्वेन दर्शितत्वात् अथाकथंचित्तत्रतति: प्रमात्वस्य
शक्यापपादनत्वे प्रतीतेर्भ्रमत्वकल्पना या अन्याप्यत्वे च अन्यथाका
पि विषयव्यवस्थानस्यादिति भावः सामान्यवदन्यत्र प्रमेयत्ववदन्यत्र
अलीकमित्यनेन प्रमेयत्वस्य स्पष्टत्वस्य च तं॥ नन्वलीकस्य ज्ञानविषय
त्वमानाभावरत्यत आह अन्यादीति शशशृंगमिति प्रतीतिविषयस्य
शशीयशृंगस्यापारमार्थिकत्वेनालीकत्वमेवेति भावः अस्त्वस्यातेरि
ति॥ ज्ञानविषयत्वस्य कालसंबंधित्वव्याप्यत्वादित्यर्थः तेनन नेसिद्ध्यासि

द्विव्याख्यान: अस्मत्तो पित्रानिकाल्ला संबंधिन्यलीकरणे वक्ता न विषयत्वे
न न तद्व्याप्यत्वं तस्य संभवतीत्यर्थे तस्लन्निरासात् रासशृंगमित्यादि
प्रतीतेश्च शृंगस्य रासभीयत्वेन भानोपगमेनान्यथाख्या सैवोपपत्तेरि
ति न तदन्यथानुपपत्यातत्सिद्धिरिति भावः ॥ अथयात् सत्ख्यातिस्तथा
पि धर्मियत्वसाध्यकाव्याप्तिपरिहारे पि ज्ञेयत्वादिसाध्यके साडुर्वा
रैवेति तुष्यदुर्जनइति न्यायेनाह किंचेति कश्चित्तु सिद्ध्यसिद्धिव्याघा
तादाह किंचेति न दस्तत् उक्तरीत्या तत्परिहारात् इत्य मपीति अ
सत्ख्यातिस्वीकारेपीत्यर्थः अव्याप्तिः साध्यवदन्याप्रसिद्धिनिबंधनाव्या

तर्क.
२२

भिः तथाव्याप्तिमेव दर्शयति नन्विति भवद्भिः असद्व्याप्तिवादिभिः
विरोधाद्वितिशेषः लीलावतीकारमतमाशंकते अन्ये त्विति संबंधः सा
ध्यसामानाधिकरण्यं धूमवानग्नेरित्यादौ वह्नौ धूमसामानाधिक
रण्यसत्त्वादतिव्याप्तिरतः कार्त्स्न्येनेति अयोगोलकीयवह्नौ धूमसामा
धिकरण्याभावेन कार्त्स्न्येन संबंधाभावान्नदोषः अत्रास्वरसमाह तत्रेति
तत्र लक्षणवाक्यं वदंति दूषणं वदंतीति कार्त्स्न्यं साध्यसाधनेसाधन
वतिचेति प्रथममुखेनैदवाह कोपमिति साध्यकार्त्स्न्ये दूषणेनैव सा
ध्यवति कार्त्स्न्यं विवक्षणे दूषणासंभवेन दूषकं तन्नो दंकितं प्रसिद्धानुमाने॥ २२

त२

वह्निमान् धूमादित्यादौ अव्याप्तिमेव विवृणोति नहीति अयःपिंडीयव
ह्निरिति अत्र निरूपीतत्वं पञ्चम्यर्थः अयःपिंडीयवह्निनिरूपितसामानाधि
करण्याभावादित्यर्थः एकव्यक्तीति द्रव्यं पृथिवीत्वादित्यादावित्यर्थः तत्र
हेतोरेकदेशे नानैकाश्रयत्वरूपकार्त्स्न्याप्रसिद्ध्याऽव्याप्तिरिति भावः एकमात्र
वृत्तित्वेति एतद्रूपवाने तत्प्रसादादित्यर्थः अत्र हेतुमति ऐक्यं न हेतु
मिति उक्तरूपकार्त्स्न्याप्रसिद्धेवादिति भावः ननु हेतावेव कार्त्स्न्यं विवक्षि
तं तथा च प्रकृते कार्त्स्न्यस्य व्यापकत्वरूपतया हेतुतावच्छेदकव्याप
कसाध्यसामानाधिकरण्यमिति निष्कर्ष इति चेन्न द्रव्यं सत्त्वादि

तर्क
२२

त्यादिसत्तात्वव्यापकरूपव्यत्वसामानाधिकरण्यसत्वादिति व्याप्तेः।
ननु तथापि हेतुमति कार्त्स्न्यं विवक्षितं तथा च हेतुव्यापकसाध्य
सामानाधिकरण्यं तत्त्वं व्यापकत्वं वावच्छेदकतया यत्र यत्र धूमः तत्रा
वच्छेदकतया वह्निसामानाधिकरण्यसत्वात् वह्निमान् धूमादित्यादौ ल
क्षणसमन्वयः पर्वते धूमे वह्निसामानाधिकरण्यमिति प्रतीतेः अथवा
हेत्वधिकरणताव्यापकसाध्याधिकरणताकत्वं तत्वमिति चेन्न। साध्या
धिकरणवृत्तित्वरूपसाध्यसामानाधिकरण्यस्य तत्तदाधेयभेदेन भि
न्नतया तद्वृत्तित्वाभावप्रतियोगित्वरूपव्यापकत्वस्यासंभवात् प्रथमस्या
स्या

निरुक्तत्वात् द्वितीये चैतदपेक्ष्य हेतुव्यापकं यत्साध्यं तत्समानाधिकर
णस्यैव लघुत्वात् तस्यापि च वक्ष्यमाणव्याप्त्यपेक्षया गुरुत्वेन हेयत्वा
दिति न किंचिदेतत् ननु साध्यसमानाधिकरणस्य समानाधिकरणा
न्तकत्वं व्याप्तिरित्यनेन यावंतः साध्यसमानाधिकरणास्ते सर्वे हेतु
समानाधिकरणा इत्यर्थलाभः स्यात् तथा च गंधवत्त्वादित्यादौ गंधसा
मानाधिकरणद्रव्यत्वादीनां अन्यत्वसामानाधिकरण्यादतिव्याप्तिकारण
यावत्त्वस्यानिवेशः ॥ अत्र तत्प्रकारकप्रमाविषयत्वादिना मनिप्रयावदं तद्घा
तृतीयाऽव्याप्तसामानाधिकरण्याभावेन च नातिव्याप्तिः इदं तु न संगच्छते

म

तर्क. अनु. २४

इदं वाच्यं ज्ञेयत्वादित्यत्र वाच्यत्व समानाधिकरणानां यावतां
ज्ञेयत्वसमानाधिकरणत्वा[illegible] लक्षणसंभवे पि वह्निमान् धूमादित्या
दौ वह्निसमानाधिकरणानां यो [illegible] गोल
कत्वादीनां धूमसामानाधिकरण्याभावादव्याप्तिः धूमवान् वह्नेरित्यादाव
तिव्याप्तिश्चेत्यत आह ॥ यत्समानाधिकरणा इति वह्निसमानाधिकरण द्रव्य
त्वादीनां धूमसामानाधिकरण्याद्व्यभिचारिण्यतिव्याप्तिवारणाय यावत्त्वं तद् इति ।
इदमेव समु[illegible]च्चयति भवति वत्वादीनां धूमस्येति । निरूपकत्वं षष्ठ्यर्थः धूम
निरूपिता वह्निष्ठा व्याप्तिर्नास्तीत्यर्थः अन्यद्रव्यं गुणकर्मान्यत्वे सति सत्वा

२६

नि१

दित्यादौ विशिष्टसत्तायाः सत्तायाश्चैक्येन सत्तासमानाधिकरणानां सत्त्वे गु
णत्वादीनां द्रव्यत्वसामानाधिकरण्याभावादव्याप्तिः एवं गुणकर्मान्यत्वविशिष्ट
सत्तावान् जातेरित्यत्रातिव्याप्तिश्च जातिसमानाधिकरणानां सर्वेषां सत्ता
समानाधिकरण्यादिति तन्न विशिष्टस्यातिरिक्तत्वमंगीकृत्य तल्लक्षणाभिधा
नात् विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्ये गुणः सत्तावानिति प्रतीतिवत् गुणो
गुणकर्मान्यविशिष्टसत्तावानिति प्रतीत्यापत्तेर्विशिष्टस्यातिरिक्तत्वेन
वाच्यमिति एवं चेन्नोक्ताव्याप्त्यतिव्याप्ती ॥ ननु विशिष्टस्यातिरिक्तत्वेपि सत्ता
धिकरणतायां विशिष्टसत्ताधिकरणतायाश्चैक्येन गुणे गुणकर्मान्यत्ववि

शिष्टसत्त्वावानितिप्रतीत्यापत्तिवारणाय विशिष्टस्यातिरिक्तत्वांगीक
र्त्तापि विशिष्टनिरूपिताधिकरणताया अतिरिक्तत्वमवश्यमंगीकार्यमे
वं च किं विशिष्टस्यातिरिक्तत्वेनेति पूर्वोक्तदोषस्तदवस्थ एव ततो विशि
ष्टस्यानतिरिक्तत्वेपि लक्षणमाह यद्विशिष्टेति यद्विशिष्टसमानाधिकरणाया
वंतः साध्यसमानाधिकरणात्यन्ताभावत्वं चेति पाठं यत्पदं हेतुतावच्छेदकपरं
तेन एतादृशलक्षणकरणे च अनतिरिक्तत्वेपि। अविना विशिष्टस्याति
रिक्तत्वमंगीकृत्य पूर्वलक्षणं संचितं॥ केचित्तु॥ विशिष्टस्यानतिरिक्तत्व
पूर्वोक्ताव्याप्तिरित्याशीत्यत आह यद्विशिष्टेत्यादि पूर्वलक्षणएव हेतुना २५

ति।

च्छेदकसाध्यतावच्छेदकनिवेश इति भावः इत्याहुः [illegible] तदवच्छेदकत्व
नेन लक्षणान्तरत्वकथनस्यासंगतत्वापत्तेः तस्मात् मदुक्तरीतिमात्रानुसर्त
व्या नन्वेवमपि गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तेः साध्य
तावच्छेदकस्यापि निवेश आवश्यक इति वाच्यं ॥ विशिष्टसत्तायां विशिष्टस
त्तानिरूपिताधारतासंबंधेन साध्यतायां जातित्वसमानाधिकरणगुणत्वादि
नां विशिष्टनिरूपिताधारतासंबंधेन विशिष्टसत्ताधिकरणद्रव्यवृत्तित्वाभा
वेनातिव्याप्त्यभावात् ॥ समवायेन तस्याः साध्यत्वे तु सकलत्वादिनोक्त
षाभावादित्यभिप्रायात् ॥ यदि च समवायेनैव तत्साध्यता गुणगुणकर्मान्य

त.प.अ.

त्वविशिष्टसत्त्वाना स्तीतिधीबलात् गुणकर्मान्यत्वविशिष्टसत्ताभावस्य

५१

गुणत्वेन विशिष्टसत्तात्वावच्छिन्नाभाववद्वृत्तितया व्यभिचारित्वे॥ न च स

अभावो न प्रतियोगिव्यधिकरण इति वाच्यं॥ प्रतियोगितावच्छेदकावच्छिन्न

प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वस्यैव व्यभिचारितया तस्य तत्रापि स

त्वात् अन्यथा भूतत्वमूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादेर्व्यभिचारित्वानुपप

त्तेः लाघवेन निरवच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव व्यभिचारित्वाच्चेति सम

वायेन विशिष्टसत्तायाः साध्यतायामप्यतिव्याप्तिरिति विभाव्यते तदा सा

ध्यतावच्छेदकमपि निवेश्यं॥ अत एव यद्विशिष्टसमानाधिकरणं यावन्तः

साध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकरणस्तद्धत्वं वेति तन्न इच्छयं गुणक
र्मान्यत्वसतिसत्वादित्यादौ विशिष्टसत्तायाश्च नतिरिक्तेपिनाव्याप्तिः नैच गुण
कर्मान्यत्वविशिष्टसत्तावारजातेरित्यादावतिव्याप्तिरिति युक्तं केयु तल्लोलितः
पाठोत्पत्तेश्रतिनकाप्यनुपपत्तिः तन्नचानतिरिक्तत्वेपीत्यपिनाविशष्टिस्यति
रिक्तत्वमंगीकृत्य प्रथेलन्नणंमचिनन्दमेवलक्षणं संग मयति भवतित्वे
तिनवद्धूमातिस्त्वविशिष्टसमानाधिकरणसर्वधूमसमानाधिकरणत्वमि
तिनेत्वर्थः वह्नित्वविशिष्टसमानाधिकरणमादेतल्गतायोगोलकत्वाद
धूमासमानाधिकरणत्वादितिभावः धूमव्याप्तिः धूमनिरूपिताव्याप्तिः

त० क० ४४

२९

साधनतावच्छेदकसंबंधेन साधनाधिकरणत्वं वाच्यं अन्यथा स
मवायेन धूमाधिकरणवृत्तिधूमावयवत्वादीनां वह्निसमानाधिकरणत्वाभा
वादव्याप्तेः एवं साध्याधिकरणत्वमपि साध्यतावच्छेदकसंबंधेन अन्यथा
वह्न्यधिकरणवृत्त्ययोगोलकत्वादीनामपि कालिकसंबंधेन धूमाधिकर
णायोगोलकवृत्तित्वादतिप्रसंगापत्तेः धूमसमानाधिकरणानां संयोगेन वह्न्य न
धिकरणपर्वतादिवृत्तित्वात् समवायेन वह्निसाध्यके संयोगेन धूम हेतुके
तिव्याप्तेश्च एवं साधनाधिकरणवृत्तित्वं तदवच्छेदकसंबंधेन साध्याधिकरणावृ
त्तित्वं वाच्यं अन्यथा वह्निसमानाधिकरणायोगोलकत्वादीनामपि धूमा

४७

धिकरणमहानसादौ कालिकसंबंधेन वृत्तित्वादिति व्याप्तिनाशस्येति न
न्वसाधनाधिकरणवृत्तित्वं यदि साध्यतावच्छेदकसंबंधेन विवक्षितं तदा र
दमेतद्रूपाभिन्नं गुणत्वादित्यादौ गुणत्वाधिकरणसमवेतानां पाकजानामेतद्रूपभि
न्नसमवेतत्वादिति व्याप्तिः ॥ एतद्रूपमात्रसमवेतस्याप्रसिद्धेः नापि साध्यतावच्छे
दकसंबंधे जातिमान् ज्ञेयत्वादित्यत्र ज्ञेयत्वाधिकरणसमवेतानां यावतां जाति
मत्समवेतत्वादिति प्रसंगात् न च विषयतया तद्वृत्तित्वं विवक्षणीयं वह्निमान्
धूमादित्यादौ विषयतया धूमाधिकरणवृत्तीनां धूमवन्मात्रविषयकज्ञानादी
नां वह्न्यधिकरणेपि विषयतया वृत्तेर्लक्षणासमन्वयः धूमवान् वह्नेरित्या

तर्क

२८

दौ अयोगोलकमात्रविषयकज्ञानादीनां धूमासमानाधिकरणत्वान्ना
तिव्याप्तिरिति वाच्यं घटभिन्नं मेयत्वादित्यत्र मेयत्वाधिकरणवृत्तिज्ञा
नानां घटभिन्नत्वसमानाधिकरणत्वादतिव्याप्तिः घटमात्रविषयकज्ञानस्य
चाप्रसिद्धत्वात् न च येन केनचित् संबंधेन साधनाधिकरणवृत्तित्वं विवक्षित
मिति वाच्यं द्रव्यं सत्वादित्यादौ सत्वाधिकरणवृत्तीनां यावतामेव कालिक
संबंधेन द्रव्यत्वाधिकरणकालवृत्तित्वादव्याप्तिरिति चेन्न येन येन संबंधेन
साधनाधिकरणवृत्तयो यावंतस्तेन तेन संबंधेन साध्याधिकरणवृत्तयस्त
त्वस्य विवक्षितत्वात्। यदि चैवमननुगम इति विभाव्यते तदा विशेषण

२८

ताविशेषणां साध्यनाधिकरणवृत्तयो यावन्तो विशेषणताविशेषं साध्या
धिकरणवृत्तिधर्मत्वमिति वाच्यं धूमवत्त्वप्रकारकप्रमाविशेष्यत्वादीनां व
ह्निसमानाधिकरणत्वाल्लक्षणासमन्वयः अयोगोलकत्वप्रकारकप्रमाविशे
ष्यत्वस्य धूमासमानाधिकरणत्वान्न व्यभिचारिण्यतिप्रसंग इति निष्कर्षः के
वलान्वयिनि लक्षणमुपपादयति साध्यमिदमिति इदं निरुक्तं व्याप्तिलक्ष
णं केवलान्वयिनि केवलान्वयिसाध्यके प्रमेयमभिधेयत्वादित्यादावेव चेति म
लमथ्याक्तमित्यनेनान्वयः एवं च एतादृशस्य व्याप्तित्वे लाघवादिति
हेतुव्यापकसाध्यसामानाधिकरण्यरूपतायाम्पेक्षया लाघवादित्य

धे:॥ नन्व प्रतियोगिवैयधिकरण्यादिनिवेशेन गौरवादिति भावः सा
ध्यवदिति साध्यवदन्यावृत्तित्वस्य गगनादावपि सत्वेन वह्निसाध्यके
गगनादावतिव्याप्तिरतः साध्यसमानाधिकरणत्वमिति ननु तत्र व्या
प्तिसत्वेपि पक्षधर्मताज्ञानविरहेणैवानुमितिवारणे किं तद्वारणाय वि
शेषणोपादानेनेति वाच्यं गगनं भवृत्तीत्यवृत्तित्वज्ञानस्य गगनं पर्वतवृ
त्तीति ज्ञानेयाह्याभावावगाहिन्या प्रतिबंधकत्वेन तदनुपपत्तावपि भिन्न
विषयकस्य गगनवान्पर्वत इति ज्ञानस्योत्पत्तौ बाधकाभावेन पक्षध
र्मताज्ञानस्यापि संभवेन तद्वारणाय विशेषणोपादानस्यावश्यकत्वा

त एवं रदंड्रव्यं घटत्वप[illegible] ट त्वोभयस्मादित्यत्र विरुद्धेतिव्याप्ति
वारणाय तस्यावश्यकत्वं इदं नु साध्यसामानाधिकरण्य ज्ञानस्याप्यन्व
यव्यतिरेकाभ्यां कारणत्वाभिप्रायेण अन्यथानुवृत्तिमत्त्वनिवेशेनापिग
गनादिवारणसंभवइतिबोध्यं नचेदमिति साध्यवदन्यावृत्तित्वमि
त्यर्थः नेदमनुमानमिति॥ नकेवलान्वयिसाध्यकानुमानमित्यर्थः व्याप्ति
ज्ञानाभावात् तादृशानुमितेरप्रसिद्ध्या न तत्कारणतया तदनुमानस्वी
कार इतिभावः तत्रापीति साध्यवदन्यावृत्तित्वविशिष्टसाध्यसामानाधि
करण्यरूपव्याप्तिः स्वरूपतोपि अस्यानिरुक्तव्याप्तिस्वरूपस्यलघुत्वात्॥

यभावादप्रवेशेन लघुत्वात् न व्यापकत्वस्य व्यापकत्वादन्यस्य दुर्वचत्वे
याव्यापकत्वस्य चाभावघटितत्वेन गुरुतया कुतोऽस्य लघुत्वमिति वा
च्यं अपेक्षाबुद्धिविशेषविषयत्वरूपस्यैव साकल्यस्यात्र प्रवेशनीयत्वात्
वस्तुतस्तु साध्यवदन्यावृत्तित्वस्य स्वाधिकरणावृत्तिसाध्याभावकत्वरू
पस्यैव व्याप्तिव [illegible] त्वाणीयत्वेनावृत्तित्वस्य च साध्य
वत्ताग्रहविरोधिता नियामकसंबंधेनावश्यं वक्तव्यतया विरोधितानियाम
कत्वस्य च समवायाभावीयविशेषणतासाधारणस्याननुगतस्याभावाज्ञे
यत्वेन निरुक्तव्याप्तिस्वरूपस्यैव लघुत्वात् निरुक्तव्याप्तिस्वरूपे च
विशेषणेन समानाधिकरणस्य निवेशेन व्यापकतांशे प्रतियोगिवै

यद्धिकरणपाठप्रवेशो न लाघवस्यातिस्फुटत्वादिति एवं गुरुधर्माव
च्छिन्नसाध्यके साध्यतावच्छेदकावच्छिन्नाभावाप्रसिद्ध्याऽव्याप्तिर्वार
णीया साध्यतावच्छेदकावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकधर्माव
च्छिन्नाभाववद्वृत्तित्वं व्याप्तिरिति वक्तव्यं तत्र च तादृशप्रतियोगितानवच्छे
दकत्वं च तादृशप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदनिवेशान्न
न संभवति घटत्वादेः प्रतियोगितावच्छेदकत्वापत्तेः यो धीबादिमत्त्वावच्छिन्नव
न्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य गुरुत्वेन तादृशाभावाप्रसिद्धेः किंतु
तादृशप्रतियोगितावच्छेदकं न तद्व्याप्तित्वेनोपादाय तत्तद्व्यक्तित्वावच्छि

न्नप्रतियोगिताकभेदकूटएव निवेश इति गौरवात्तद्दुर्ज्ञेयत्वाच्च न तादृशव्या
प्तिर्नानुमितिहेतुरिति ध्येयं॥ ननूपलक्षणं प्रमेयत्वमनुमितौ मास्त्वनुव्यवसायव्यवसा
यबलादेव तत्स्वीकारस्यावश्यक इति प्रागेवोक्तमिति सर्वत्र व्यभिचारशंका
संभवेन व्याप्तिग्रहानुदयात् कारणाभावेनानुमितेरसिद्ध्या न तत्कारणतया
नुमानं प्रमाणमिति चार्वाकमतं दूषयितुं तन्मतमुपन्यस्यति अत्र चार्वा
का इति। किंचिदिति धूमसमानाधिकरणत्वसामानाधिकरण्येन वह्निसा
मानाधिकरण्याभावसंशये धूमसमानाधिकरणत्वावच्छेदेन वह्निसा
मानाधिकरण्यरूपव्याप्तिग्रहानुदयादित्यर्थः ननु तादृशशंकायामपि

व्याप्तिग्रहे किंबाधकमत आह नचेति निरुक्तीत्यर्थः एवं ईदृशशंकायां धूमस
मानाधिकरणत्वसामानाधिकरण्येन वह्निसामानाधिकरण्याभावशंकायां।
तस्याः तादृशशंकायाः न प्रतिबंधकत्वात् तादृशव्याप्तिग्रहे प्रतिबंधकत्वा
त् [illegible] भूतलत्वसामानाधिकरण्येन घटाभाववत्ताज्ञानस्य निर्णयात्मनः भू
तलत्वावच्छेदेन घटवत्ताज्ञाने बाधनिर्णयविधया प्रतिबंधकत्वेपि तादृश
शंकायाः [illegible] तत्प्रतिबंधकत्वं यथा ह्यसंशयस्यापि प्रतिबंधकत्वे च पर्वतो व
ह्निमान्न वेति संशयेनानुमित्यादेरनुत्पत्त्यापत्तिरिति चेन्न [illegible] सामग्रीप्रति
बंधिकायत्र विशेषादर्शने तद्धीरपि तर्केति न्याये न विशिष्य [illegible] विशे

तर्क

षदर्शनाभावविशिष्टतदभावप्रकारज्ञानत्वेन संशयस्यापि प्रतिबंधक
त्वांगीकारात् यथा स्थाणुर्वा पुरुषो वेति संशयोत्तरं विनैव विशेषदर्शनं सं
शयोत्तरप्रत्यक्षापत्तेः तत्र बाधनिर्णयस्याभावात् संशयस्य च न तन्नये प्र
तिबंधकत्वादिति यदि चाप्रामाण्यज्ञानाभावादिभिर्विशेष्यविशेषणाभा
वविनिगमनाविरहेण विशेषदर्शनस्योत्तेजकत्वासंभवात् विशेषदर्शना
भावविशिष्टतदभावप्रकारकज्ञानत्वेन संशयस्य प्रतिबंधकत्वं विशेषद
र्शनस्यान्यकाले संशयोत्तरप्रत्यक्षानुत्पत्तिप्रसंगः संशयोत्तरप्रत्यक्षे विशेषद
र्शनस्य हेतुत्वकल्पनेन तदभावादेवोपपत्तेरिति विभाव्यते तदा तादृशसं

२२

शयसामग्रीप्रतिबंधिकाबाध्येतिभावः ननु वकुसुधूमवन्स्योः सामाना
धिकरणदर्शनमेवतादृशशंकाविरोधीत्याशयेनाह नवेति भूयोदर्शना
त् बकुपुसाध्यसाधनयोः सहचारदर्शनात् तन्निवृत्तिव्यभिचारशंकानि
वृत्तिः प्रातराद्इति घटादिरूपाद्यपिवीलोहलेख्यापार्थिवत्वादिसाधे घटा
दिषुपार्थिवत्वलोहलेख्यत्वयोःसामानाधिकरण्यग्रहेपिहीरके व्यभि
चारग्रहादित्यर्थः तथाच व्यभिचारेणाभूयोदर्शनस्यनतादृशशंकाप्रति
बंधकत्वमितिभावः ननुधूमवन्स्योःकार्यकारणभावात् धूमोयदिवह्नि
व्यभिचारीस्यात्तर्हिवह्निजन्योनस्यादितितर्कएवधूमोवह्निव्यभिचारीत

व्याप्त्यंशकानिवर्तकः पार्थिवत्वलोहलेख्यत्वयोः कार्यकारणभावाभा
वात् यदि लोहलेख्यं न स्यात्तदा पार्थिवं न स्यादिति तर्कासंभवान्न तत्र
व्यभिचारशंकाविरह इत्याशंकते न च तर्कादिति धूमो यदि वह्नि व्यभिचा
रि स्यात्तदा वह्निजन्यो न स्यादिति तर्कादित्यर्थः तन्निवृत्तिः व्यभिचारशं
कानिवृत्तिः व्याप्तिग्रहमूलकत्वेन व्याप्याद्यापादकयोर्व्याप्तिग्रहमूलकत्वे
न अनवस्थानादिति तर्कमूलभूतव्याप्तावपि व्यभिचारशंकानिरासा
र्थं तर्कापेक्षायामनवस्थेत्यर्थः तथा च मूले शेषिल्यान्तेन तर्कस्य तच्छंका
निवर्तकत्वमिति भावः अत्र विपर्यये तर्कोरिमात्रापर्यवसानमिष्टे

पत्तिः मूलशैथिल्यं चेति तर्के त्रयो दोषाः विपर्ययेतरकोटिमात्रपर्यवसायिन
एव तर्कस्य तदभावशंकानिवर्तकत्वात् तदितरकोटिपर्यवसाने च तद्दर्शनेन
वात विपर्ययेतरकोटिमात्रापर्यवसानस्य इष्टकत्वे बोध्यं इष्टापत्तेश्च तर्कका
रणीभूताया व्यतिरेकनिर्णयविघटकत्वेन मूलशैथिल्यस्य च तत्कारणी
भूताया व्याप्यादकपाव्याप्तिग्रहप्रतिबंधकत्वेन यथायथं दूषकता बोध्या उपस
हरति इत्यर्थं चेति व्यभिचारशंकाप्रतिबंधकस्याभावेन जागरूके व्यभिचारसं
शये च इत्यर्थः ग्राहकाभावात् व्यभिचारस्तानाभावात् रूपग्राहकाभावात् कु
तइति कृत्नोऽतस्तारनुमानं प्रमाणं स्यादित्यर्थः अनुमितिकरणतयैवानुमान

तर्क० अनु०

प्रामाण्यं व्याप्यनिश्चयेनानुमितेरभावात् तत्करणतयाऽनुमानप्रामा
ण्यं दुरापास्तमिति भावः व्यभिचारज्ञानविरहादिकमिति तद् [illegible]
३० हेतो[illegible] नाज्ञानं प्रति तदभाववत्ताज्ञानाभावस्य हेतुतया
ऽव्यभिचारस्य व्याप्तिग्रहे साध्याभाववद्वृत्तित्वादिरूपव्यभिचारज्ञानाभावो
हेतुः [illegible]यः आदिना सहचारज्ञानपरिग्रहः न च साध्याभाववद्वृत्तित्वांशे सं
शयसत्वे व्याप्यग्रहात्संशयनिश्चयसाधारणव्यभिचारज्ञानाभाव एव हेतुर्वा
च्यस्तथा च पक्षीयसाध्यसंदेहात्मे व्यभिचारसंशयस्यापि प्रतिबंधकत्व
प्रसक्तावनुमानमात्रोच्छेदप्रसंग इति वाच्यं साध्याभाववत्त्वांशे निश्चयात्म २६
कवृत्तित्वांशे संशयनिश्चयसाधारणव्यभिचारज्ञानाभावस्यैव हेतुतात्

ननु ज्ञानादीनाम व्याप्यवृत्तितया व्यभिचारज्ञानसत्त्वेपि घटाद्यवच्छेदेना
त्मनि समवायेन तदभावसत्वाद्व्याप्तिग्रहोपपत्तिरिति चेन्न । समवायसंबंधा
वच्छिन्नप्रतियोगिताकव्यभिचारज्ञानं विशिष्टात्मत्वाभावस्य स्वसमानाधि
करणैकत्वसंबंधेन व्यभिचारज्ञानाभावस्य हेतुत्वात् । तस्य च व्याप्यवृत्ति
त्वादिति ॥ अथ तथापि धूमाव[illegible]स्य सहचारज्ञानस्य व्याप्तिग्रहहेतुत्वे
मानाभावः न च विरुद्धसहचारभ्रमाद्व्याप्तिभ्रमदर्शनादन्वयव्यतिरेका
भ्यां तस्य कारणत्वमिति वाच्यं ग्राहकसामग्रीक्रमयौगपद्याभ्यामेव सहचा
रग्रहव्याप्तिग्रहक्रमयौगपद्ययोरुपपत्तेस्तयोः परस्परं हेतुत्वे मानाभा
वादिति चेन्नैवं पक्षसमानाधिकरणं पार्वतीयधूमो इत्यत्र धूमे हेतुसा

मानाधिकरण्यरूपसहचारज्ञानस्य विशेषणज्ञानत्वेन हेतुतयातस्यै
वादिपदेन संगृहीतत्वात् ननु साध्यसाधनसहचारज्ञानस्याविशेषेण प्र
तिबंधकाभावांतरस्यापि आदिपदेन संगृहीतत्वादिति दिक् ननु व्यभि
चारज्ञानविरहः संशयनिश्चयसाधारणज्ञानाभावः सर्वत्र तत्संशयसत्वे
च कथं संघटते इत्याशंक्य निराचष्टे नचेति तर्कात् धूमो यदि वह्निव्यभि
चारी स्यात्तर्हि वह्निजन्यो न स्यादिति तर्कात् अनवस्थां निरस्यति क्वचित्त
न्मूलेति तर्कस्य मूलीभूतेत्यर्थः तन्निवृत्तेः व्यभिचारशंकानिवृत्तेः ननु
सर्वत्र व्यभिचारशंकाकोटिस्मृतिर्वाऽस्त्येवसत आह अनुभूयते दे
ति तस्मात् प्रमाणाभावेन संशयसामग्र्येव न कल्प्यत इति भावः ननु

ला०२

तर्कस्य व्यभिचारशंकानिवर्त्तकत्वे प्रमाणाभावः अनाहार्य्यशंकायास्तर्क
काले नभिन्नतज्ज्ञाने नैव निरस्तत्वात् तथाहि व्याप्तिप्रतिपक्षधर्मतांशेनाहा
र्यरूपं व्याप्याद्यव्याप्यापादकवत्ताज्ञानं व्याप्याद्यव्यतिरेकनिश्चयश्च हेतुव्या
प्तिग्रहान्वयतो व्यतिरेकतश्च तथा च धूमो यदि वह्निव्यभिचारी स्यात्तर्हि व
ह्निजन्यो न स्यादित्यत्र वह्निव्यभिचारित्वं वह्निजन्यत्वाभावव्याप्यमिति
व्याप्तिज्ञाने वह्निजन्यत्वाभाववह्निव्यभिचारित्वव्यापकत्वग्रहात्
वह्निव्यभिचारित्वव्यापको वह्निजन्यत्वाभाव इति ज्ञानसंपत्त्या पाद्यव्यति
रेकनिर्णयविषयपानदभावज्ञानस्य च सत्त्वात् वह्निव्यभिचारित्वव्यापका
भाववत्ताज्ञानसंपत्तिसंभवात् नाहार्य्यव्यभिचारित्वशंकासंभवः एवं वह्नि

जन्यत्वव्यापकीभूताभावप्रतियोगिवह्निव्यभिचारित्वमिति रेकव्याप्तिग्र
हेऽपि वह्निव्यभिचारित्वाभावे वह्निजन्यत्वव्यापकत्वग्रहे तु तुल्यवित्तिवेद्य
तया वह्निजन्यत्वेऽपि वह्निव्यभिचारित्वाभावव्याप्यत्वग्रहे वह्निव्यभिचारि
त्वाभावव्याप्यं वह्निजन्यत्वमिति ज्ञानसंभवेन न तद्वत्ताज्ञानस्य यादृशव्यति
रेकनिरूपितविधेयतासत्वेन तदभावव्याप्यवत्ताज्ञानस्य सत्वान्नेतादृशश-
ङ्कोदयः [illegible]पि निरुक्तापादकव्यापकव्यापाद्यतदभाववत्त्वाद्यमिति ज्ञा
नेऽपि तद्व्यापकाभाववत्ताज्ञानस्य विशिष्टवैशिष्ट्यावगाहित्वे एव तद्वत्ताज्ञा
नं प्रति प्रतिबन्धकतया कथं तस्य विरोधित्वं एवं व्यतिरेकिणि आपा
दकाभावव्याप्यः आपाद्याभाववत्त्वा आपाद्यमिति ज्ञानसंभवेऽपि तदभाव

व्याप्यवत्ताज्ञानस्यापि विशिष्टवैशिष्ट्यावगाहित्वेन एव तत्र प्रतिबंध-
कत्वान्नासंभव एवेति [illegible] व्यापको वह्निः वह्न्यभाववान् [illegible] इति
ज्ञानरूपसाधारण्याय तद्धर्मावच्छिन्नेतिविशेष्यकव्यापकत्वग्रहकालीनतद्ध-
र्मावच्छिन्नाभाववत्तानिश्चयत्वेनैव व्यापकाभाववत्ताज्ञानस्य प्रतिबंधक-
त्वात्॥ [illegible]कपित्वव्याप्यकरादिकरादिकरादिमांश्चायमिति ज्ञानरूपसा-
धारण्याय तद्धर्मावच्छिन्नेति विशेष्यकव्याप्यत्वग्रहकालीनतद्धर्मावच्छिन्न-
वत्तानिश्चयत्वेनैव तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वादुक्तज्ञा-
नरूपसत्त्वेन लक्षणे [illegible]संभवात् यदि च व्यतिरेके आपादकाभावे आपा-

तर्क
२७

याभाववव्यापकत्वग्रहेऽपि व्याप्याभाववत्त्वापादकाभावव्याप्यत्वज्ञान
स्य न नैयत्यं तुल्यवित्तिवेद्यत्वे मानाभावात् एवं [illegible] कापकत्वग्रहेऽपि व्या
प्याभाववत्त्वापादकाभावव्याप्यत्वज्ञानस्य न नैयत्यं तुल्यवित्तिवेद्य
त्वे मानाभावात् एवं व्यापकाभावज्ञानस्य तदभाववव्याप्यवत्ताज्ञानस्य
च विशिष्टवैशिष्ट्यावगाहित्वेन एवं लाघवात् प्रतिबंधकत्वे उक्तज्ञानद्व
यस्याप्रतिबंधकत्वेऽपि न दुत्तरोत्पन्नाविशिष्टज्ञानादेव प्रतिबंध इति प्र
कृते व्यापादकसंशयोत्पत्तौ बाधकाभाव इति विभाव्यते तथापि व्याप्या
याभाववत्तानिश्चयस्यापादकज्ञाने व्याववर्त्तकधर्मदर्शनविषयाप्र

२७

तिबंधकत्वमत्र्यां हतमित्यनाहार्य्यव्यभिचारित्वसंशयासंभवात् आहा
र्यशंकाया स्वविरोधित्वात्तर्कस्य वैयर्थ्यमिति चेत् अत्रोच्यते अनाहार्य
शंकानिवृत्तिसंभवेप्याहार्यशंकानिवर्त्तकत्वेनैव तर्कस्य वैयर्थ्यमिति चे
त् अत्रोच्यते अनाहार्य्यशंकानिवृत्तिसंभवेप्याहार्यशंकानिवर्त्तकत्वेनैव त
र्कस्योपयोगः न स्याच्चाप्रतिबंधकत्वेनाहार्यज्ञानस्य प्रतिबंधकत्वादप्रतिव
ध्यत्वाच्चेति वाच्यं अनिष्टप्रसंजनात्मकतर्केण आपादकज्ञाने आपाद्य
ज्ञानरूपानिष्टसाधनत्वज्ञानजनेन आपादकज्ञाने द्वेषोत्पत्त्या तत्र इच्छानु
त्पत्तौ इच्छारूपकारणाभावेन आहार्यशंकानुदयात् तर्केण तन्निवर्त्तकत्व
